अस्मत्सम्बन्धिनि "स रथेन रथीतमोऽस्माकेनाभियुग्वना" ऋ० ६,४५,१५ । लोके तु आस्माकः ।

**अस्मि** अव्य० अस–मिन् । अहमर्थे, "त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति" सा०द० । "अस्मिता" । "दुदुमनास्मि सागरम्" रघुः "अह्नैवास्मि न शोकभाक्" ।

**अस्मिता** स्त्री अस्मि–भावः तल् । अहमिति ममेतिवेत्यभिमाने "अविद्यास्मितारागद्वेषाभिनिवेशाः" पात०सू० सचाभिमानोमोह इत्युच्यते यथाह सां०कौ० । "देवा ह्यष्टविधमैश्वर्य्यमासाद्यामृताभिमानिनोऽणिमादिकमात्मीयं शाश्वतिकमभिमन्यन्ते इति सोऽयमस्मितामोहोऽष्टविधैश्वर्य्यविषयत्वादष्टविधः" तल्लक्षणमुक्तं पात०सू० । "दृग्दर्शनशक्त्योरेकात्मतेवास्मिता" दृक्शक्तिः पुरुषः दृश्यते इति दर्शनं तच्छक्तिः बुद्धिः शक्तिशब्दोयोग्यतार्थः भोक्तृभोग्ययोरत्यन्तविविक्तयोर्दृग्दृश्ययोरविद्याकृता आत्मता तादात्म्यम् इवशब्देन अहमस्मीत्यस्य भ्रान्तिकृतत्वम् तादात्म्यस्य द्योतितम् साऽस्मितेत्यर्थः इयं हृदयग्रन्थिरित्युच्यते ब्रह्मवादिभिः इति" वृत्तिः ।

**अस्मृति** स्त्री अभावे न०त० । स्मरणाभावे ।

**अस्यवामीय** न० अस्य वामेति शब्दोऽस्त्यत्र सूक्ते मत्वर्थे छ । अस्य वामेति शब्दयुक्ते सूक्ते तच्च सूक्तम् "अस्य वामस्य पलितस्य" इत्यादिकं द्विपञ्चाशदृचम् ऋ०१,१६४, सूक्तम् । "स्तेयं कृत्वा द्विजोमोहात् त्रिरात्रोपोषितः शुचिः । सूक्तं जप्त्वाऽस्यवामीयं क्षिप्रं मुच्येत किल्विषात् "ऋग्विधाने १,२२६, । महाव्रते वैश्वशस्त्रं वैश्वदेवं निविद्धानं द्विप्रतीकं तत्राऽस्य वामदेवस्येत्यादिकमेकचत्वारिंशदृचं प्रथमं, प्रतीकम् तच्च पञ्चमारण्ये सूत्रितम् "अस्य वामस्य पलितस्य होतुरिति' दैर्घतमसम् एकचत्वारिंशदृचम् तच्च तस्मिन्नेव सूक्ते "गौरीर्मिमाय सलिलानि" इत्यन्तमेकचत्वारिंशदृचम् । "सकृत् जप्त्वाऽस्यवामीयं शिवसङ्कल्पमेव च अपहृत्य सुवर्णन्तु क्षणाद्भवति निर्म्मलः" मनुः कुल्लू० एतद्व्याख्याने अस्य वामस्य पतितस्येति पाठः लिपिकरप्रमादकृतः पलितस्येत्येव सूक्ते पाठदर्शनात् ।

**अस्यहत्य** पु० हन–बा क्यप् न०त०असिना अहत्यः ३त० । खड्गेनाहननीये अनुशतिकादिकार्थम् । [शतिका० ।

**अस्यहेति** पु० असिर्हेतिर्यस्य । खड्गासाधने योधे । अनु-

**अस्युद्यत** त्रि० असिरुद्यतोयेन वा परनि० । उद्धृतखड्गे ।

**अस्र** पु० अस–रन् । १कोणे २केशे च । ३रुधिरे ४चक्षुर्जले च न० अश्रशब्दे उदा० ।

**अस्रकण्ठ** पु० अस्रः कोण इव कण्ठोऽस्य अस्रयुक्तकण्ठोवास्य । वाणे हारा० तस्य पातने हि शत्रुरुधिराक्तमुखत्वात् कोणाकारमुखत्वाच्च तस्य तथात्वम् ।

**अस्रखदिर** पु० अस्रवर्णः रक्तवर्णः खदिरः । विट्खदिरे ।

**अस्रज** न० अस्रात् रुधिरात् पाकेन जायते । मांसे । तस्य रुधिरजातत्वमसृक्करशब्दे ५५८ पृष्ठे दृश्यम् ।

**अस्रप** पु० अस्रं रुधिरं पिबति पा–क । १राक्षसे २तद्देवताके मूलानक्षत्रे च । "द्विरागमं लघुध्रुवे चरेऽस्रपे मृदूडुनि" मुहूर्त्त चि० क्विप् अस्रपाप्यत्र । [रक्तशाके भिण्डाख्ये ।

**अस्रपत्रक** पु० अस्रमिव रक्तं पत्रमस्य संज्ञायाम् कन् ।

**अस्रपा** स्त्री अस्रं पिबति पा–क्विप् क वा । (जोँक) जलौकसि । तस्याः भेदादिकं सुश्रुते दर्शितं यथा "अथ जलायुका वक्ष्यन्ते । जलमासामायुरिति जलायुका जलमासामोक इति जलौकसः । ता द्वादश तासां सविषाः षट् तावत्य एव निर्विषाः । तत्र सविषाः कृष्णा कर्ब्बुरा अलगर्द्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति । तास्वञ्जनचूर्णवर्णा पृथुशिराः कृष्णा । कूर्म्ममत्स्यवदायता छिन्नोन्नतकुक्षिः कर्व्वुरा । रोमशा महापार्श्वा कृष्णमुख्यलगर्द्दा । इन्द्रायुधवदूर्द्ध्वराजिभिश्चित्रिता इन्द्रायुधा । ईषदसितपीतिका विचित्रपुष्पाकृति चित्रा सामुद्रिका । गोवृषणवदधोभागे द्विधाभूताकृतिरणुमुखी गोचन्दनेति । ताभिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्रं कण्डूर्मूर्च्छा ज्वरोदाहश्छर्दिर्मदः सदनमिति लिङ्गानि भवन्ति । तत्र महागदः पानालेपननस्यकर्म्मादिषूपयोज्यः । इन्द्रायुधादष्टमसाध्यमित्येताः सविषाः सचिकित्सिता व्याख्याताः ॥ अथ निर्विषाः । कपिला पिङ्गला शङ्कुमुखी मूषिका पुण्डरीकमुखी सावरिका चेति । तत्र मनःशिलारञ्जिताभ्यामिव पार्श्वाभ्यां पृष्ठे स्निग्धमुद्गवर्णा कपिला, किञ्चिद्रक्ता वृत्तकाया पिङ्गाशुगा च पिङ्गला । यकृद्वर्णा शीघ्रपायिनी दीर्घतीक्ष्णमुखी शङ्कुमुखी । मूषिकाकृतिवर्णानिष्टगन्धा च मूषिका । मुद्गवर्णा पुण्डरीकतुल्यवक्त्रा पुण्डरीकमुखी । स्निग्धा पद्मपत्रवर्णाष्टादशाङ्गुलप्रमाणा सावरिका सा च पश्वर्थे । इत्येता अविषा व्याख्याताः ॥ तासां यवनपाण्ड्यसह्यपौतनादीनि क्षेत्राणि । तेषु महाशरीरा बलवत्यः शीघ्रपायिन्यो महाशना निर्विषाश्च विशेषेण भवन्ति ॥ तत्र सविषमत्स्यकीटदर्दुरमूत्रपुरीषकोथजाताः कलुषेष्वम्भःसु च सविषाः ॥ पद्मोत्पलनलिनकुमुदसौगन्धिककुवलयपुण्डरीकशैवालकोथजाता विमलेष्व